CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥ॐहिरण्यवर्णांहरिणींसुवर्णरजतस्रजां॥
चंद्रांहिरण्मयींलक्ष्मीजातवेदोमआवह॥तांमआवहजातवेदो
लक्ष्मीमनपगामिनीं॥यस्यांहिरण्यंविंदेयंगामश्वंपुरुषान्
हं॥अश्वपूर्णांरथमध्यांहस्तिनादप्रबोधिनीं॥श्रियंदेवीमु
पह्वयेश्रीर्मादेवीर्जुषतां॥कांसोस्मितांहिरण्यप्राकारामा
र्द्रज्वलंतींतृप्तांतर्पयंतीं॥पद्मेस्थितांपद्मवर्णांतामिहोपह्वये
श्रियं॥चंद्रांप्रभासोयशसाज्वलंतींश्रियंलोकेदेवजुष्ट
मुदारां॥तांपद्मनेमिंशरणंप्रपद्येऽअलक्ष्मीर्मेनश्यतांत्वांवृ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लोमि॥१॥ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तववृक्षोथ
बिल्वः॥तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअल
क्ष्मीः॥उपैतुमांदेवसखः कीर्तिश्चमणिनासह॥प्रादुर्भूतोस्मि
राष्ट्रेस्मिंकीर्तिंवृद्धिंददातुमे॥क्षुत्पिपासामलांज्येष्ठामल
क्ष्मींनाशयाम्यहं॥अभूतिमसमृद्धिंचसर्वान्निर्णुदमेगृ
हात्॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥ईश्वरींस
र्वभूतानांतामिहोपह्वयेश्रियं॥मनसःकाममाकूतिंवाचःसत्य
मशीमहि॥पशूनांरूपमन्नस्यमयिश्रीश्रयतांयशः॥२॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कर्दमेनप्रजाभूतामयिसंभवकर्दम॥श्रियंवासयमेगृहेमातरं
पद्ममालिनीं॥आपःसृजन्तुस्निग्धानिचिक्लीतवसमेगृहे॥नि
चदेवीमातरंश्रियंवासयमेकुले॥आर्द्रांपुष्करिणींपुष्टींसुव
र्णांहेममालिनीं॥सूर्यांहिरण्मयींलक्ष्मीजातवेदोममावह॥आ
र्द्रांपुष्करिणींपुष्टींपिंगलांपद्ममालिनीं॥चंद्रांहिरण्मयींलक्ष्मीजात
वेदोममावह॥तांम्यकामावहजातवेदोलक्ष्मीमनपगामिनीं॥य
स्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं॥यःशुचिः
प्रयतोभूत्वाजुहुयादाज्यमन्वहं॥श्रियःपंचदशर्चंश्रीकामः

लु २

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सततंजपेत्॥३॥पद्मानेपद्मरूपद्माक्षीपद्मसंभवेत्॥तस्मे भ
जसिपद्मालयेनसौख्यंलभाम्यहं॥अश्वदाईसदाईधनदाप्रि
महाधने॥धनंमेजुषतांदेविसर्वकामांश्चदेहिमे॥पुत्रपौत्रधनं
धान्यंहस्त्यश्वादिगवेरथं॥प्रजानांभवसिमातामायुष्मंतंकरो
तुमे॥धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः॥धनमिंद्रोबृह
स्पतिर्वरुणंधनमुच्यते॥वैनतेयसोमंपिबसोमंपिबंतुवृ
त्रहा॥सोमंधनस्यसोमिनोमंदायसखायिनः॥नकोधनेन
मात्सर्यंनलोभोनाशुभामतिः॥भवंतिकृतपुण्यानांभक्तानांश्री

सिद्धं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सूक्तेजयेत्॥ सरसिजनिलये सरोजहस्ते धवलतरांशुकगंधमाल्य
शोभे॥ भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद
मह्यं॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानंमहीय
तेधान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः॥ध॥
॥इतिश्रीसूक्तंसमाप्तं॥शुभंभवतु॥ ॥ ॥ ५२॥ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi